भौजस्य गोदानमिति यावत् । अननुज्ञातत्यागभोगविषयमेतत् । तदनुज्ञया त्वनापद्यपि न दोषः "स्वयमेवेत्येवकारः स्वापत्यानां व्युदासार्थः । भर्तृव्युदासस्य पतिर्नार्हतीत्यनेनाभिधानात् । भर्तृव्युदासे सतो वहिरङ्गाणां भ्रात्रादीनां व्युदासस्यापि दण्डापूपिकया सिद्धत्वात् । अनापदीत्यभिधानादापदि न दोषः । अतएव 'पुत्त्रार्त्तिहरणे चापि स्त्रीधनं भोक्तुमर्हतीति' तस्यैव वाक्यशेषः । पतिरित्यनुषङ्गः । पुत्त्रग्रहणं कुटुम्बोपलक्षकं तस्यार्त्तिर्भक्ष्याद्यभावनिमित्ता पीड़ा तस्या हरणे । चशब्दादन्यस्मिन्नपि धनाभावनिमित्ते सङ्कटे स्त्रीधनमननुज्ञातमपि पतिस्त्यक्तुं भोक्ताुमर्हतीत्यर्थः । ननु परधने त्यागभोगयोः स्वाम्यनुज्ञया विना कथमर्हता बाधिताऽनेन बोध्यते । अनुज्ञायान्त्वनापद्यपि न विरोधः । उच्यते । वचनबलात्तादृशविषये व्यये स्वत्वमेव तस्य तत्रेत्यदोषः । अतएव योगीश्वरोऽपि "दुर्भिक्षे धर्म्मकार्य्ये च व्याधौ सम्प्रतिरोधके । गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति" । धर्म्मकार्य्ये आवश्यके नित्ये नैमित्तिके च सम्प्रतिरोधके दण्डाद्यर्थं राज्ञावरोधे कृते । वाचस्पतिस्तु सम्प्रतिरोधक इति व्याधिविशेषणं कार्य्यानुष्ठानबाधके इति च तदर्थं इत्याह । नाकामो दातुमर्हतीत्यपि दारिद्र्यादिकृतदानासामर्थ्ये दुर्भिक्षादिगृहीतमप्यवश्यं देयमेतावतैव वचनोपपत्तौ सामर्थ्येऽप्यदानमिच्छयेत्यस्य कल्पयितुमनर्हत्वात् । पतिग्रहणादापद्यपि पत्युरेव पत्नीधनग्रहणाधिकारः प्रतिदानञ्चेच्छया नान्यस्येति ज्ञेयम् । भर्त्रा दातुं प्रतिश्रुतं भार्य्यायै तस्मिन् मृते पुत्त्रादिभिस्तस्यै देयमित्यप्याह स एव "भर्त्रा प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैरिति" । सुतग्रहणं पौत्त्रप्रपौत्त्रयोरुपलक्षणमृणवदित्यभिधानात् । अनेन स्त्रीधने जीवन्त्यान्तस्यां सुतानां जन्मना स्वत्वेऽपि नास्ति विभाग इति गम्यते । एवं स्त्रीधनमुक्तम्" । दायभागमतं पारिभाषिकपरत्वपक्ष एव । अनयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम् । उत्तराधिकारिशब्दे ११०१ पृ० च तद्विभागो दृश्यः ।

**स्त्रीधव** पुं० स्त्रियं धुनाति धु-अच् । पुरुषे जटा० ।

**स्त्रीधर्म्म** पुं० ६त० । ऋतौ नारीकुसुमविकाशे रजसि हेमच० ।

**स्त्रीधर्म्मिणी** स्त्री स्त्रीधर्म्मोऽस्त्यस्या इनि । ऋतुमत्यां स्त्रियाम् अमरः ।

**स्त्रीपण्योपजीविन्** पुं० स्त्रीरूपेण पण्येन जीवति जीव-णिनि । धनं गृहीत्वा सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तल्लब्धधनोपजीविनि ।

**स्त्रीपुंधर्म्म** पुं० स्त्रियाः पुंसश्च धर्म्मः तमधिकृत्य व्यवहारो वा । स्त्रीपुंसयोः यथाशास्त्राचाररूपे धर्म्मे तद्विषयके अष्टादशसु विवादपदेषु मध्ये विवादपदभेदे स्त्रीपुंसयोगोऽप्यत्र । वीर० तत् न्यरूपि यथा "तत्स्वरूपमाह नारदः "विवाहादिविधिः स्त्रीणां यत्र पुंसाञ्च कीर्त्त्यते । स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते" इति । विवाहादिशब्देन स्त्रीपुंधर्म्मा गृह्यन्ते । अतएव मनुर्व्यवहारपदोद्देशकाले स्त्रीपुंधर्म्मौ विभागस्त्वत्युद्दिश्य प्रतिज्ञापूर्वकं तेषां निरूपणं चकार "पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः । संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान्" इत्यादिना संयोगे अन्योन्यसन्निधाने विप्रयोगे देशतः कालतो वा व्यवधाने । शाश्वतान्नित्यान् अवश्यानुष्ठेयानिति यावत् । के ते धर्म्मा इत्याकाङ्क्षायामाह स एव "अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् । विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे" इत्यादि । पुरुषैः भर्त्तृपुरुषैः । विषये दण्डहेतुभूतवाक्पारुष्यादिविषये । नारदोऽपि "स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः । अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्" इति । अतोऽन्यैरपि स्त्रीणामस्वातन्त्र्यं यथा भवति तथा कल्पयितव्यमित्याशयः । पुरुषेण स्त्री व्यभिचारादवश्यं रक्षणीया । तथा च हारीतः "एकव्रतस्वकत्वभावात् परेन्द्रियोपहतत्वाच्च दुष्टाः कुलसङ्करकारिण्यो भवन्ति जीवति जारजः कुण्डो मृते भर्त्तरि गोलकस्तस्माद्रेतोपाघातान्जायां रक्षेज्जायानाशे कुलनाशः कुलनाशे तन्तुनाशस्तन्तुनाशे देवपितृयज्ञनाशो देवपितृयज्ञनाशे आत्मनाशः आत्मनाशे सर्व्वनाशः" इति । एकव्रतस्वकत्वभावात् स्त्रीणां एकभर्त्तेति नियमनाशात् । परेन्द्रियोपहतत्वात् परस्मिन् पुंसि इन्द्रियस्य मनसो रागादिना उपहतत्वात् । कुलसङ्करकारिण्यस्तज्जातिस्वभावानुगतप्रजोत्पादनेन कुलसाङ्कर्य्यकारिण्यः । अतएव शङ्खलिखितौ "यस्मिन् भावोऽर्पितः स्त्रीणामात्मैवे तादृशं तन्तुमुत्पादयन्तीति" । तन्तुः पुत्त्रादिसन्ततिः । मनुरपि "सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः । द्वयोर्हि